| E-208 | Roll No. ........................................ | | |
|---|---|---|---|
| Higher Secondary Examination (Regular) - 2019 | | | |
| संस्कृत (सामान्यम्)<br>**SANSKRIT (General)** | | | |
| Total Questions : 22 | Total Printed Pages : 8 | Time : 3 Hours | Maxi. Marks : 100 |

निर्देशः –

(i) सर्वेप्रश्नाः अनिवार्याः सन्ति। (ii) प्रश्नानां सम्मुखे अङ्काः प्रदत्ताः।

1. उचितविकल्पं चित्वा लिखत – 1x5=5

(क) "सौन्दर्यबोधः" इत्यस्मिन् पदे समासः अस्ति –

(i) तत्पुरुषः (ii) कर्मधारयः

(iii) द्विगुः (iv) बहुब्रीहिः

(ख) "अनुरुपम्' इत्यस्य पदस्य समास विग्रहः भवति -

(i) रुपं योग्यम् (ii) रुपेन योग्यम्

(iii) रुपस्य योग्यम् (iv) रुपात् योग्यम्

(ग) "पञ्चविंशतिः' इत्यस्मिन् पदे समासः अस्ति -

(i) कर्मधारय समासः (ii) द्विगुः समासः

(iii) बहुब्रीहिः (iv) द्वन्द्वः समासः

(घ) अधोलिखितेषु 'कर्मधारयसमासः' अस्ति –

(i) द्रुपदात्मजा (ii) नीलोत्पलम्

(iii) अश्रद्धा (iv) दुग्धजलभेदविधौ

(ङ) "जगन्नाथः' पदे सन्धिः अस्ति –

(i) स्वरसन्धिः (ii) विसर्गसन्धिः

(iii) व्यञ्जनसन्धिः (iv) अयादिसन्धिः

2. उचितविकल्प चित्वो लिखत - 1×5=5

(क) "रिशाङ्कः खलु गीतं गायति' इत्यस्मिन् वाक्ये अव्ययम् अस्ति-

(i) रिशाङ्कः (ii) खलु

(iii) गीतं (iv) गास्यति

(ख) अधोलिखितेषु अव्ययम् अस्ति-

(i) अस्ति (ii) स्तः

(iii) सन्ति (iv) भूयः

(ग) अधोलिखितेषु अव्ययं नास्ति -

(i) स्मः (ii) पुरा

(iii) प्रायः (iv) पुनः

(घ) अधोलिखितेषु उपसर्गः नास्ति –

(i) अधि (ii) अति

(iii) मति (iv) प्रति

(ङ) "सज्जनः' इत्यत्र सन्धिः अस्ति -

(i) व्यञ्जनसन्धिः (ii) विसर्गसन्धिः

(iii) स्वरसन्धिः (iv) यणसन्धिः

3. उचितविकल्पं चित्वा लिखत – 1×5 = 5

(क) "कृतिः'' इत्यस्मिन् पदे प्रत्ययः अस्ति –

(i) क्त (ii) क्तिन्

(iii) तृच् (iv) यत्

(ख) अधोलिखितेषु "क्त्वा'' प्रत्ययस्य उदाहरणम् अस्ति –

(i) पठित्वा (ii) पठितवान्

(iii) पठितुम् (iv) पठितव्यम्

(ग) "नारी'' इत्यस्मिन् पदे प्रत्ययः अस्ति –

(i) ङीष (ii) ङीप्

(iii) टाप् (iv) ङीन्

(घ) "विहस्य'' इत्यस्मिन् पदे प्रत्ययः अस्ति –

(i) क्त (ii) ल्यप्

(iii) शतृ (iv) अच्

(ङ) "मनोरथः' पदे सन्धिः अस्ति –

(i) स्वरसन्धिः (ii) व्यञ्जनसन्धिः

(iii) विसर्गसन्धिः (iv) गुणसन्धिः

4. उचितविकल्प चित्वा लिखत- 1x5=5

(क) "अक्रुध्यत्" अस्मिन् पदे लकारः अस्ति-

(i) लट्लकारः (ii) लोट्लकारः

(iii) लृट्लकारः (iv) लङ्.लकारः

(ख) "लभे" इत्यत्र वचनम् अस्ति।

(i) एकवचनम् (ii) द्विवचनम्

(iii) बहुवचनम् (iv) अन्यवचनम्

(ग) "अस्तु" अस्मिन् पदे धातुः अस्ति –

(i) आस् (ii) अस्

(iii) स्था (iv) तु

(घ) "यथारूपं तथा भूषा यथा नाम ............ गुणः"|

(i) कथा (ii) प्रथा

(iii) तथा (iv) व्यथा

(ङ) "............ क्षेमकरः"।

(i) प्रारम्भः (ii) शुभारम्भः

(iii) आरम्भः (iv) अल्पारम्भः

5. उचितविकल्पं चित्वा लिखत - 1x5=5

(क) "सलिलम्' इत्यस्य पर्यायशब्दः अस्ति –

(i) नीरजम् (ii) पङ्कजम्

(iii) जलम् (iv) जलजम्

(ख) "अखण्डम्' इत्यस्य विलोमशब्दः अस्ति –

(i) खण्डम् (ii) प्रचण्डम्

(iii) पाखण्डम् (iv) भूभृतः

(ग) "कुपितः" इत्यस्य विलोमशब्दः अस्ति –

(i) सज्जनः (ii) शान्तः

(iii) प्रकृष्टः (iv) विवेकः

(घ) “परितः" पदस्य योगे विभक्तिः भवति –

(i) द्वितीया
(ii) तृतीया
(iii) चतुर्थी
(iv) पञ्चमी

(ङ) संस्कृते कः कारकं नास्ति ?

(i) करणं
(ii) सम्प्रदानम्
(iii) अपादानम्
(iv) सम्बन्धः

6. अधोलिखितेषु प्रश्नेषु त्रयाणां प्रश्नानाम् उत्तराणि संस्कृतभाषायाम् एक वाक्येन देयानि-2x3=6

(i) कण्वः अन्ते किमाशीर्ददाति ? http://www.mpboardonline.com

(ii) सरयूः कुतः प्रसरति ?

(ii) सोमशर्मा कस्य गृहे रात्रौ स्थितः ?

(iv) कः प्रज्ञावान् अस्ति ?

(v) के पराभवं व्रजन्ति ?

7. अधोलिखितेषु एकस्य कवेः संक्षिप्त परिचयं लिखत – 2

(i) श्री हर्षः

(ii) शूद्रकः

(iii) डॉ. राजेन्द्र मिश्रः

8. अधोलिखितेषु द्वयस्य प्रश्नानाम् उत्तराणिसंस्कृतभाषायां लिखत – 2

(i) ‘स्वप्नवासवदत्तम्' केन विरचितम् ?

(ii) ‘कादम्बरी' कस्य रचना अस्ति ?

(iii) ‘बुद्धचरितम्’ एतस्य रचनाकारः कः ?

9. आदिकविः कः ? तेन कस्य ग्रन्थस्य रचनामकरोत् ? 2

अथवा

पुराणानां रचनाकारः कः? एकस्य पुराणस्य नाम लिखत।

10. महाभारतं केन विरचितम्? अस्मिन् काव्ये कति पर्वाः सन्ति ? 2

अथवा

वेदानां नामानि लिखत।

11. अधोलिखितेषु त्रयाणाम् अशुद्धकारक वाक्यानां शुद्धिः करणीया - 3

(i) लोकस्य उपर्युपरि शम्भुः अस्ति।

(ii) मुनिः शिलायाम् अधिशेते।

(iii) शिक्षकः छात्रं धर्ममुपदिशति।

(iv) बालकं ज्ञानं ददाति।

(v) कृष्णं नमः।

12. अधोलिखितेषु शब्देषु त्रयाणां शब्दानां रूपाणि निर्देशानुसारं लिखत – 3

(i) मनस् (मन) - चतुर्थी विभक्तिः - एकवचनम्

(ii) विद्वस् - षष्ठी विभक्तिः - बहुवचनम्।

(iii) गो - सप्तमी विभक्तिः - एकवचनम्

(iv) अदस् (स्त्रीलिङ्ग) - तृतीया विभक्तिः - द्विवचनम्

13. युग्ममेलनं कुरूत - 4

| 'अ' | | 'ब' |
|---|---|---|
| (i) न कुर्याम् | - | (अ) बलेत्यतिबलेति च |
| (ii) बलेन तपसांलब्धे | - | (ब) भवन्ति मायाविषु ये न मायिनः |
| (iii) यो विद्यया हन्ति | - | (स) कर्म चेदहम् |
| (iv) व्रजन्ति ते मूढधियः | - | (द) यशः परेषाम् |

14. अधोलिखितेषु चतुर्णा प्रश्नानाम् उत्तराणि संस्कृत भाषायाम् एक पदेन लिखत - 4

(i) कुमारसम्भवस्य रचयिता कः ?

(ii) कस्य धैर्यज्वलितं हि तेजः ?

(iii) विश्वपर्यावरण दिवसः कदा आयोज्यते ?

(iv) सोमशर्मणा कतिविद्या अधीताः ?

(v) चम्पूरामायणस्य रचनां कः अकरोत् ?

15. प्रदत्तैः शब्दैः अनुच्छेद लेखनं कुरूत - 4

[आश्रमे, शिष्येषु, विनम्रः, सफला, ऋषिः, जलं, गुरोः, कर्तुं]

कस्मिंश्चित् तपोवने धौम्यनामा ......... अवसत्। तस्य ......... विद्यार्थिनः विद्याध्ययनार्थम् आगच्छति। तेषु ........... आरूणिः अपि अन्यतमः आसीत्। सः सौम्यः ..... सरलहृदयश्च आसीत्। एकदा ऋषिः तं वर्षर्ती आश्रमस्य क्षेत्रेषु ........... रोद्धुं अप्रेषयत्। आरूणिः ........... आज्ञां स्वीकृत्य तथा ........... क्षेत्रम् अगच्छत्। गुरोः आज्ञां कथं भवेत् इति विचार्य सः निजशरीरमेव बन्धंस्थाने अस्थापयत्।।

अथवा

[आधारोऽस्ति, पर्यावरणं, आक्सीजनवायूं, कार्बनडाइआक्साइडवायु, स्वस्थं, वृक्षाः, कुर्वन्ति, वायु, आक्सीजनवायुं] http://www.mpboardonline.com

स्वस्थं पर्यावरणम् अस्माकं जीवनस्य...........। पर्यावरणस्यचाधाराः पुष्पिताः पल्लविताः ........... भवन्ति। वृक्षाः ........... स्वस्थं कुर्वन्ति ते मानवैः परित्यक्तान् वातावरणे च प्रसृतान् अन्यान् प्रदूषितान् वायून् ऊदस्थान्...........। प्रत्येक प्राणी श्वसनक्रियायां ........... गृह्णानि। कार्बनडाइआक्साइड ...........बहिः विसृजति। वृक्षाः च ........... गृह्णानि ........... च विसृजन्ति। अनेन पर्यावरणं ........... भवति।

16. प्रश्नपत्रे समागतान् श्लोकान् विहाय स्वपाठ्यपुस्तकस्य सुभाषितंद्वयं लिखत। 4

17. प्रदत्तैः शब्दैः चतुर्णा रिक्तस्थानानि पूरयत् - 4

[वाण्यै, विनायकः, मध्यरात्रपर्यन्तं, श्रमशमनधीरं, याथार्थ्यविदः]

(i) तस्यै .............. नमोनमः।।

(ii) स्पन्दनया तु .............. निद्रा एव न प्राप्ता।

(iii) न सन्ति .............. पिनाकिन ?

(iv) न च .............. कश्चित्।

(v) तदेतत्ते तीरं .............. भवतु न।

18. अधोलिखितेषु गद्यांशेषु गद्यांशद्वयस्य प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत - 2x4= 8

(क) कीर्तिरागत्य 'प्रभो ! क्षमस्व ! कीर्तिभवनस्य चत्वारः स्तम्भाः धन – त्याग – सत्य - सदाचाराः भवन्ति। तान् स्तम्भान् विमुच्य कीर्तिभवनं कुत्रापि न प्रतिष्ठितं भवति। अतो मयि अपि प्रसीद' इति निवेदयामास।

(i) कीर्तिः किम् अवदत् ?

(ii) सदाचारः कस्य स्तम्भः अस्ति ?

(iii) कीर्तिभवनस्य स्तम्भः द्वयं किम् अस्ति ?

(iv) "भवति" पदे का धातुः अस्ति ?

(ख) अद्य जन्मभूमिः स्वकीयं ऋणं याचते। आत्मायं सनातनः। शरीरमेव नश्वरम्। गृहे स्थितोऽपि,विषयवासनामज्जितोऽपिजनो म्रियते एव। परन्तु छत्रपतिपुत्रा राणाप्रतापकुलजा अशफाकुल्लावंशधरा वा न कातरीभूय छागीभूय मेषीभूय कीटीभूय प्राणांस्त्यज़न्ति। वीर पुत्राणां वीरगतिर्भवति, स्वर्गलोकश्च प्राप्यते। http://www.mpboardonline.com

(i) अद्य जन्मभूमिः स्वकीयं किम् याचते ?

(ii) कः आत्मायम् ?

(iii) किं नश्वरम् अस्ति ?

(iv) केषां वीरगतिर्भवति स्वर्गलोकश्च प्राप्यते ?

(ग) अस्मान् परितो यावरणं तदेव पर्यावरणपदेन संज्ञायते। आवरणस्य एतानि तत्त्वानि सान्त- पृथिवाजलवायुतेजोऽकाशाख्यानि पञ्चमहाभूतानि, वनस्पतयः, औषधमः जलचरखेचर- सरीसृप-कीटादयः, जन्तवः, पालितपशवः, आरण्यकाः पशवः अन्यानि च निसर्गजातानि वस्तूनि एतेषां सर्वेषां समष्टिः पर्यावरणं कथ्यते।

(i) पर्यावरण पदं किं ज्ञायते ?

(ii) आवरणस्य कानि मुख्य तत्त्वानि सन्ति ?

(iii) 'अन्यानि' इति पदे का विभक्तिः अस्ति ?

(iv) 'जन्तवः' इति पदे किं वचनम् अस्ति ?

19. अधोलिखित पद्यांशेषु पद्यांशद्वयस्य प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत – 2x4=8

(क) निधानं धर्माणां किमपि च विधानं नवमुदां http://www.mpboardonline.com

प्रधानं तीर्थानाममलपरिधानं त्रिजगतः।
समाधानं बुद्धेरथ खलु तिरोधानमधियां
श्रियामाधानं नः परिहरतु तापं तव वपुः ॥

(i) गङ्गावपुः केषां निधानम् ?।

(ii) तीर्थानां प्रधानं कः ?

(iii) गङ्गावपुः कस्याः समाधानम् ?

(iv) "वपुः' इत्यत्र का विभक्तिः अस्ति ?

(ख) न वैरमुद्दीपयति प्रशान्तं
न दर्पमारोहति नास्तमेति।।
न दुर्गतोऽस्मीति करोति मन्यु
तमार्यशीलं परमाहुरायः ॥

(i) कः प्रशान्तं वैरं न उद्दीपयति ?

(ii) आर्यशीलः किं न आहुः ?

(iii) कीदृशं पुरुषम् आर्याः किम् आहुः ?

(iv) कः दुर्गतोऽस्मीति मन्युं न करोति ?

(ग) वने रणे शत्रुजलाग्निमध्ये महार्णवे पर्वतमस्तके वा।।

सुप्तं प्रमत्तं विषमस्थितं वा रक्षन्ति पुण्यानि पुराकृतानि ॥

(i) वने नरं के रक्षन्ति ?

(ii) रणे पुराकृतानि पुण्यानि केभ्यः रक्षन्ति ?

(iii) सुप्तं प्रमत्तं वा विषमस्थितं कानि रक्षन्ति ?

(iv) "पुण्यानि' इत्यस्य पदस्य विलोम पदम् लिखत्।।

20. स्वस्य प्राचार्यस्य कृते स्वस्य स्थानान्तरण प्रमाणपत्रार्थं एकं प्रार्थना पत्र लिखत। 4

अथवा

मित्रं कृते एकं पत्रं संस्कृतभाषायां लिखत।

21. अधोलिखित - अपठितगद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत - 5

संसारे अनेकेषां दुःखानां मूलकारणम् अज्ञानम् एव। अज्ञानात् एव समाजे नानाविकाराणां जन्म भवति। हिंसा भ्रष्टाचारादयः ये उपद्रवाः अस्मान् पीड़यन्ति तेषां मूले अशिक्षा एवं वर्तते। वयं शिक्षायाः प्रकाशेन अज्ञानस्य अन्धकारं हर्तुं सज्जाः भवेम्।

(i) संसारे अनेकेविकाराः कथं जायन्ते ?

(ii) दुःखानां मूलकारणं किम् ?

(iii) के उपद्रवाः अस्मान् पीड़यन्ति ?

(iv) गद्यांशस्य उचित शीर्षकं लिखत।

(v) 'अज्ञानात्' पदे का विभक्तिः अस्ति ?

22. अधोलिखितेषु एकस्मिन् विषये शतशब्देषु संस्कृतभाषायां निबन्धं लिखत - 10

(i) अस्माकं देशः

(ii) ग्राम्यजीवनम्

(iii) संस्कृतभाषायाः गौरवम्

(iv) परोपकारः

*** **** ***